"ग्रीष्मे पुनर्भृशोष्णोपहतत्वात् शरीरमसुखोपपन्नं भवति। उष्णवातातपभातमतिशिथिलमत्यन्तप्रविलीनदोषं भेषजं पुनः संशोधनार्थमुष्णस्वभावमुष्णागुगमनात्तात्तरत्वमापद्यते। तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरं पिपासोपद्रवाय।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥
"मयूखैर्जगतः सारं ग्रीष्मे पेपीयते रविः।
स्वादुशीतं द्रवं स्निग्धमन्नपानं तदा हितम्॥
शीतं सशर्करं मन्थं जाङ्गलान्मृगपक्षिणः।
घृतं पयः स शाल्यन्नं भजन् ग्रीष्मे न सीदति॥
मद्यमल्पं न वा पेयमथवा सुबहूदकम्।
लवणाम्लकटूष्णानि व्यायामश्चात्र वर्ज्जयेत्॥
दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतलम्।
भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके॥
व्यजनैः पाणिसंस्पर्शैश्चन्दनोदकशीतलैः।
सेव्यमानो भजेदास्यां मुक्तामणिविभूषितः॥
काननानि च शीतानि जलानि कुसुमानि च।
ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः॥"
इति च सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्॥)
तत्र जातफलं यथा, कोष्ठीप्रदीपे।

"ग्रीष्मोद्भवो भोगभवानुरक्तो
वक्ता सुशीलो जलकेलिशीलः।
विद्याधनैश्वर्य्ययशोमनोज्ञो
धन्वी सुवेशः परदारचित्तः॥"

उष्णः। इति मेदिनी। मे। १०॥ गर्‌मि इति तात् इति च भाषा॥ तद्वति त्रि॥

ग्रीष्मजा, स्त्री, (ग्रीष्मात् ग्रीष्मप्रभावात् ग्रीष्मे ग्रीष्मकाले वा जायते या इति। जन्+डः। ततष्टाप् च।) लवणी। इति शब्दचन्द्रिका॥ लोणा इति भाषा॥ (ग्रीष्मजातमात्रे, त्रि॥)

ग्रीष्मपुष्पी, स्त्री, (ग्रीष्मे ग्रीष्मकाले पुष्पं यस्याः। जातौ संज्ञायां वा ङीप्।) करुणीपुष्पवृक्षः। इति राजनिर्घण्टः॥

ग्रीष्मभवा, स्त्री, (ग्रीष्मे ग्रीष्मसमये ग्रीष्मारामे इत्यर्थः भवति उत्पद्यते या। भू+अच्। टाप्।) नवमल्लिका। इति रत्नमाला॥
("कुमारिका ग्रीष्मभवा सुगन्धा।"
इति वैद्यकरत्नमालायाम्॥)

ग्रीष्मसुन्दरकः, पुं, (ग्रीष्मे सुन्दर इव कायते शोभते इति। कै+कः। ग्रीष्मसुन्दर+स्वार्थे कन् वा।) शाकविशेषः। गिमा इति भाषा॥ तस्य गुणाः। तिक्तत्वम्। लघुत्वम्। कफपित्तदोषनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥

ग्रीष्महासं, क्ली, (ग्रीष्मे ग्रीष्मसमये हासः प्रकाशः उत्पत्तिजन्यशोभेत्यर्थः यस्य।) इन्द्रतूलकम्। इति त्रिकाण्डशेषः॥ बुड़ीर सुता। इति भाषा॥

ग्रीष्मी, स्त्री, (ग्रीष्मः ग्रीष्मसमयः उत्पत्तिकारणत्वेनास्त्यस्याः। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच् ततो ङीष्।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रीष्मोद्भवा, स्त्री, (उद्भवतीति। उद्+भू+अच्। ग्रीष्मे उद्भवो यस्याः ग्रीष्मे उद्भवतीति वा।) नवमल्लिका। इति राजनिर्घण्टः॥

ग्रुच, इर् उ चौर्य्ये। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) रेफयुक्तः। पञ्चमस्वरी। इर्, अग्रुचत् अग्रोचीत्। उ, ग्रोचित्वा ग्रुक्त्वा। इति दुर्गादासः॥

ग्रैवं, क्ली, (ग्रीवायां भवम्। "ग्रीवाभ्योऽण् च।" ४।३।५७। इति अण्।) ग्रीवाभूषणम्। इति शब्दरत्नावली॥ (यथा, रघुः। ४।४८॥
"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम्।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि॥")

ग्रैवेयं, क्ली, (ग्रीवायां भवम्। "चात् ढञ्।" "ग्रीवाभ्योऽण् च।" ४।३।५७। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या चकारात् ढञ्।) कण्ठभूषणम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ७।३५।३४।
"पुनर्दिपान् द्विपारोहान् वैजयन्त्यङ्कुशध्वजान्।
तूणवर्म्माण्यथो कक्षान् ग्रैवेयाण्यथ कम्बलान्॥")

ग्रैवेयकं, क्ली, (ग्रीवायां भवमिति। "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु।" ४।२।९६। इति ढकञ्।) कण्ठभूषा। इत्यमरः।२।६।१०४॥ (यथा, मार्कण्डेयपुराणे। ८२।२५।
"नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम्॥")

ग्रैष्मी, स्त्री, (ग्रीष्मे भवेति। "सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण् ततो ङीप्। "पक्षे ऋतवः ङीप्।" इति अणित्वके।) नवमल्लिका। इति त्रिकाण्डशेषः॥ ग्रीष्मसम्बन्धिनि त्रि गात्रञ्च॥

ग्लस, उ ङ भक्षणे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्-उदित्वात् क्त्वा वेट्।) अन्तःस्थतृतीययुक्तः। उ, ग्लसित्वा ग्लस्त्वा। ङ, ग्लसते। इति दुर्गादासः॥

ग्लस्तः, त्रि, (ग्लस्+कर्म्मणि क्तः।) भक्षितः। इत्यमरः। ३।२।११२॥

ग्लह, ज कि आदाने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-वेट्।) अन्तःस्थतृतीययुक्तः। ज, अग्लहीत् अग्लाक्षीत्। कि, ग्लाहयति ग्लहति। एषः कैश्चिन्न मन्यते इति दुर्गादासः॥ (यथा, महाभारते। २।६७।१६।
"इमां चेत् पूर्व्वं कितवोऽग्लहीष्य-
दीशोऽभविष्यदपराजितात्मा॥")

ग्लहः, पुं, (ग्लह+"अक्षेषु ग्लहः।" ३।३।७०। अक्षशब्देन देवनं लक्ष्यते तत्र यत् पणरूपेण ग्राह्यं तत्र ग्लह इति निपात्यते। इति वार्त्तिकोक्त्या च निपातनात् लत्वम्।) अक्षक्रीड़ासु पणः। इत्यमरः। २।१०।४५॥ बाज् इति वाजि इति च भाषा॥ (यथा, महाभारते। २।६७।६।
"पाञ्चालस्य द्रुपदस्यात्मजामिमां
सभामध्ये यो वदेवीद् ग्लहेषु॥")

ग्लाता, [ऋ] त्रि, (ग्लायति ग्लानियुक्तो भवतीति। ग्लै+तृच्।) ग्लानियुक्तः। इति व्याकरणम्।

ग्लानः, त्रि, (ग्लै+कर्त्तरि क्तः।) रोगात् क्षीणदेहः। तत्पर्य्यायः। ग्लास्नुः २। इत्यमरः। २।६।५८॥ रोगी। इति राजनिर्घण्टः॥

ग्लानिः, स्त्री, (ग्लायति अनेनास्मिन् वा। ग्लै+"वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्।" उणां। ४।५१। इति निः।) बलहीनता। इति हेमचन्द्रः।२।२३३॥ (यथा, गीतायाम्। ४।७।
"यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत!॥")
रोगः। इति राजनिर्घण्टः॥ (यथा, भागवते। ५।२४।१३। "देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति॥")

ग्लास्नुः, त्रि, (ग्लायतीति। ग्लै+"ग्लाजिस्थश्च ग्स्नुः।" ३।२।१३९। इति स्नुः।) ग्लानः॥ इत्यमरः। २।६।५८॥ (यथा, भट्टिः।७।४।
"वसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत्॥")

ग्लुच, इर् उ चौर्य्ये गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं सेट्। उदित्वात् क्त्वावेट्।) अन्तःस्थतृतीययुक्तः। पञ्चमस्वरी। इर्, अग्लुचत् अग्लोचीत्। उ, ग्लोचित्वा ग्लुक्त्वा। इति दुर्गादासः॥

ग्लुञ्च, उ इर् गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उदित्त्वात् क्त्वावेट्। अन्तःस्थतृतीययुक्तादिः। पञ्चमस्वरी। उ, ग्लुञ्चित्वा ग्लुक्त्वा। इर्, अग्लुचत् अग्लुञ्चीत्। इति दुर्गादासः॥

ग्लेप, ऋ ङ दैन्ये। गतौ। चाले। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सकं-च-सेट्।) अन्तःस्थतृतीययुक्तः। ङ, ग्लेपते निर्धनः सदा। ऋ, अजिग्लेपत्। इति दुर्गादासः॥

ग्लेयः, त्रि, (ग्लानिमर्हतीति। ग्लै+यः।) ग्लानियोग्यः। इति व्याकरणम्॥

ग्लेव, ऋ ङ सेवे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थतृतीययुक्तः। ऋ, अजिग्लेवत्। ङ, ग्लेवते। इति दुर्गादासः॥

ग्लेष, ऋ ङ अन्वेषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) अन्तःस्थतृतीययुक्तः। ऋ, अजिग्लेषत्। ङ, ग्लेषते जिग्लेषे। अन्वेषोऽनुसन्धानम्। ग्लेषते यः सतां मार्गमिति हलायुधः। इति दुर्गादासः॥

ग्लै, क्षये। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) अन्तःस्थतृतीययुक्तः। क्षयो हर्षक्षयः। ग्लायति लोकः शोकात्। अनुपसर्गस्य णौ ज्वल ह्वल ह्मल इत्यादिना वा ह्रस्वः। ग्लपयति ग्लापयति। सोपसर्गस्य तु प्रग्लापयति। इति दुर्गादासः॥ (यथा, मनुः।२।९८।
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः॥"

ग्लौः, पुं, (ग्लायति ग्लानिं प्राप्नोति क्षयपक्षे इति भावः। ग्लै+"ग्लानुदिभ्यां डौः।" उणां।